॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय ६५

एवमुक्तस्तु हनुमान्राघवेण महात्मना ।
सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १॥

इदमुक्तवती देवी जानकी पुरुषर्षभ ।
पूर्ववृत्तमभिज्ञानं चित्रकूटे यथा तथम् ॥ २॥

सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता ।
वायसः सहसोत्पत्य विरराद स्तनान्तरे ॥ ३॥

पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज ।
पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४॥

ततः पुनरुपागम्य विरराद भृशं किल ।
ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५॥

वायसेन च तेनैव सततं बाध्यमानया ।
बोधितः किल देव्यास्त्वं सुखसुप्तः परन्तप ॥ ६॥

तां तु दृष्ट्वा महाबाहो रादितां च स्तनान्तरे ।
आशीविष इव क्रुद्धो निःश्वसन्नभ्यभाषथाः ॥ ७॥

नखाग्रैः केन ते भीरु दारितं तु स्तनान्तरम् ।
कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना ॥ ८॥

निरीक्षमाणः सहसा वायसं समवैक्षताः ।
नखैः सरुधिरैस्तीक्ष्णैर्मामेवाभिमुखं स्थितम् ॥ ९॥

सुतः किल स शक्रस्य वायसः पततां वरः ।
धरान्तरचरः शीघ्रं पवनस्य गतौ समः ॥ १०॥

ततस्तस्मिन्महाबाहो कोपसंवर्तितेक्षणः ।
वायसे त्वं कृत्वाः क्रूरां मतिं मतिमतां वर ॥ ११॥

स दर्भं संस्तराद्गृह्य ब्रह्मास्त्रेण न्ययोजयः ।
स दीप्त इव कालाग्निर्जज्वालाभिमुखः खगम् ॥ १२॥

स त्वं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति ।
ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह ॥ १३॥

स पित्रा च परित्यक्तः सुरैः सर्वैर्महर्षिभिः ।
त्रींल्लोकान्सम्परिक्रम्य त्रातारं नाधिगच्छति ॥ १४॥

तं त्वं निपतितं भूमौ शरण्यः शरणागतम् ।
वधार्हमपि काकुत्स्थ कृपया परिपालयः ॥ १५॥

मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव ।
ततस्तस्याक्षिकाकस्य हिनस्ति स्म स दक्षिणम् ॥ १६॥

राम त्वां स नमस्कृत्वा राज्ञो दशरथस्य च ।
विसृष्टस्तु तदा काकः प्रतिपेदे खमालयम् ॥ १७॥

एवमस्त्रविदां श्रेष्ठः सत्त्ववाञ्शीलवानपि ।
किमर्थमस्त्रं रक्षःसु न योजयसि राघव ॥ १८॥

न नागा नापि गन्धर्वा नासुरा न मरुद्गणाः ।
तव राम मुखे स्थातुं शक्ताः प्रतिसमाधितुम् ॥ १९॥

तव वीर्यवतः कच्चिन्मयि यद्यस्ति सम्भ्रमः ।
क्षिप्रं सुनिशितैर्बाणैर्हन्यतां युधि रावणः ॥ २०॥

भ्रातुरादेशमादाय लक्ष्मणो वा परन्तपः ।
स किमर्थं नरवरो न मां रक्षति राघवः ॥ २१॥

शक्तौ तौ पुरुषव्याघ्रौ वाय्वग्निसमतेजसौ ।
सुराणामपि दुर्धर्षौ किमर्थं मामुपेक्षतः ॥ २२॥

ममैव दुष्कृतं किं चिन्महदस्ति न संशयः ।
समर्थौ सहितौ यन्मां नापेक्षेते परन्तपौ ॥ २३॥

वैदेह्या वचनं श्रुत्वा करुणं साश्रुभाषितम् ।
पुनरप्यहमार्यां तामिदं वचनमब्रुवम् ॥ २४॥

त्वच्छोकविमुखो रामो देवि सत्येन ते शपे ।
रामे दुःखाभिभूते च लक्ष्मणः परितप्यते ॥ २५॥

कथं चिद्भवती दृष्टा न कालः परिशोचितुम् ।

इमं मुहूर्तं दुःखानामन्तं द्रक्ष्यसि भामिनि ॥ २६ ॥

तावुभौ नरशार्दूलौ राजपुत्रावरिन्दमौ ।
त्वद्दर्शनकृतोत्साहौ लङ्कां भस्मीकरिष्यतः ॥ २७ ॥

हत्वा च समरे रौद्रं रावणं सह बान्धवम् ।
राघवस्त्वां महाबाहुः स्वां पुरीं नयते ध्रुवम् ॥ २८ ॥

यत्तु रामो विजानीयादभिज्ञानमनिन्दिते ।
प्रीतिसञ्जननं तस्य प्रदातुं तत्त्वमर्हसि ॥ २९ ॥

साभिवीक्ष्य दिशः सर्वा वेण्युदग्रथनमुत्तमम् ।
मुक्त्वा वस्त्राद्दौ मह्यं मणिमेतं महाबल ॥ ३० ॥

प्रतिगृह्य मणिं दिव्यं तव हेतो रघूत्तम ।
शिरसा सम्प्रणम्यैनामहमागमने त्वरे ॥ ३१ ॥

गमने च कृतोत्साहमवेक्ष्य वरवर्णिनी ।
विवर्धमानं च हि मामुवाच जनकात्मजा ।

अश्रुपूर्णमुखी दीना बाष्पसन्दिग्धभाषिणी ॥ ३२ ॥

हनुमन्सिंहसङ्काशौ तावुभौ रामलक्ष्मणौ ।
सुग्रीवं च सहामात्यं सर्वान्ब्रूया अनामयम् ॥ ३३ ॥

यथा च स महाबाहुर्मां तारयति राघवः ।
अस्माद्दुःखाम्बुसंरोधात्तत्समाधातुमर्हसि ॥ ३४ ॥

इमं च तीव्रं मम शोकवेगं
रक्षोभिरेभिः परिभर्त्सनं च ।
ब्रूयास्तु रामस्य गतः समीपं
शिवश्च तेऽध्वास्तु हरिप्रवीर ॥ ३५ ॥

एतत्तवार्या नृपराजसिंह
सीता वचः प्राह विषादपूर्वम् ।
एतच्च बुद्ध्वा गदितं मया त्वं
श्रद्धत्स्व सीतां कुशलां समग्राम् ॥ ३६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com